# tripurasundarIShoDashopachArapUjA

# ત્રિપુરસુન્દરીષોડશોપચારપૂજા

## Document Information

Text title : tripurasundarIShoDashopachArapUjA

File name : tripurasundarIShoDashopachArapUjA.itx

Category : pUjA, devii, dashamahAvidyA, devI, ShoDasha, panchadashI

Location : doc_devii

Proofread by : Pallasena Narayanaswami ppnswami at gmail.com

Latest update : December 27, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 27, 2022

*sanskritdocuments.org*

# ત્રિપુરસુન્દરીષોડશોપચારપૂજા

શ્રીગણેશાય નમઃ ।
ૐ ક એ ઈ લ હ્રીં હ સ ક હ લ હ્રીં સ ક લ હ્રીં શ્રીં ।
કલ્પલતાદિસુરદ્રુમવાટીકલ્પિતરત્નગૃહાધિનિવાસામ્ ।
કલ્પશતાર્જિતપુણ્યવિશેષાચ્ચેતસિ ભાવનયાહમુપાસે ॥ ૧॥

એણધરાશ્મકૃતોન્નતધિષ્ણ્યં હેમવિનિર્મિતપાદમનોજ્ઞમ્ ।
શોણશિલાફલકં ચ વિશાલં દેવિ સુખાસનમદ્ય દદામિ ॥ ૨॥

ઈશમનોહરરૂપવિલાસે શીતલચન્દનકુઙ્કુમમિશ્રમ્ ।
હૃદ્યસુવર્ણઘટે પરિપૂર્ણં પાદ્યમિદં ત્રિપુરેશિ ગૃહાણ ॥ ૩॥

લબ્ધભવત્કરુણોઽહમિદાનીં રત્નસુમાક્ષતયુક્તમનર્ઘમ્ ।
રુક્મવિનિર્મિતપાત્રવિશેષેષ્વર્ઘ્યમિદં ત્રિપુરેશિ દદામિ ॥ ૪॥

હ્રીમિતિ મન્ત્રજપેન સુગમ્યે હેમલતોજ્જ્વલદિવ્યશરીરે ।
યોગિમનઃસમશીતજલેન હ્યાચમનં ત્રિપુરેઽદ્ય વિધેહિ ॥ ૫॥

હસ્તલસત્કટકાદિસુભૂષા આદરતોઽમ્બ વરોપ્ય નિધાય ।
ચન્દનવાસિતમન્ત્રિતતોયૈઃ સ્નાનમયિ ત્રિપુરેશિ વિધેહિ ॥ ૬॥

સઞ્ચિતમમ્બ મયા હ્યતિમૂલ્યં કુઙ્કુમશોણમતીવ મૃદુત્વમ્ ।
શઙ્કરતુઙ્ગતરાઙ્કનિવાસે વસ્ત્રયુગં ત્રિપુરે પરિધેહિ ॥ ૭॥

કન્દલદંશુકિરીટમનર્ઘં કઙ્કણકુણ્ડલનૂપુરહારમ્ ।
અઙ્ગદમઙ્ગુલિભૂષણમમ્બ સ્વીકુરુ દેવિ પુરાધિનિવાસે ॥ ૮॥

હસ્તલસચ્ચતુરાયુધજાલે શસ્તતરં મૃગનાભિસમેતમ્ ।
સદ્ઘનસારસુકુઙ્કુમમિશ્રં ચન્દનપઙ્કમિદં ચ ગૃહાણ ॥ ૯॥

લબ્ધવિકાસકદમ્બકજાતીચમ્પકપઙ્કજકેતકયુક્તૈઃ ।
પુષ્પચયૈર્મનસાવચિતૈસ્ત્વામમ્બ પુરેશિ ભવાનિ ભજામિ ॥ ૧૦॥

હ્રીમ્પદશોભિમહામનુરૂપે ધૂરસિમન્ત્રવરેણ મનોજ્ઞામ્ ।
અષ્ટસુગન્ધરજઃકૃતમાદ્યે ધૂપમિમં ત્રિપુરેશિ દદામિ ॥ ૧૧॥

સન્તમસાપહમુજ્જ્વલપાત્રે ગવ્યઘૃતૈઃ પરિવર્ધિતદેહમ્ ।
ચમ્પકકુડ્મલવૃન્દસમાનં દીપગણં ત્રિપુરેઽદ્ય ગૃહાણ ॥ ૧૨॥

કલ્પિતમદ્ય ધિયાઽમૃતકલ્પં દુગ્ધસિતાયુતમન્નવિશેષમ્ ।
માષવિનિર્મિલપૂપસહસ્રં સ્વીકુરુ દેવિ નિવેદનમાદ્યે ॥ ૧૩॥

લઙ્ઘિતકેતકવર્ણવિશેષૈઃ શોધિતકોમલનાગદલૈશ્ચ ।
મૌક્તિકચૂર્ણયુતૈઃ ક્રમુકાદ્યૈઃ પૂર્ણતરામ્બ પુરસ્તવ પાત્રી ॥ ૧૪॥

હ્રીંત્રયપૂરિતમન્ત્રવિશેષં પઞ્ચદશીમપિ ષોડશરૂપમ્ ।
સઞ્ચિતપાપહરં ચ જપિત્વા મન્ત્રસુમાઞ્જલિમમ્બ દદામિ ॥ ૧૫॥

શ્રીપદપૂર્ણમહામનુરૂપે શ્રીશિવકામમહેશ્વરજાયે ।
શ્રીગુહવન્દિતપાદપયોજે શ્રીલલિતાપરમેશિ નમસ્તે ॥ ૧૬॥

ઇતિ શ્રીત્રિપુરસુન્દરીષોડશોપચારપૂજા સમ્પૂર્ણા ॥

Proofread by Pallasena Narayanaswami ppnswami at gmail.com

*tripurasundarIShoDashopachArapUjA*

pdf was typeset on December 27, 2022

Please send corrections to *sanskrit@cheerful.com*